(A-13) Seat No. ____

No. Of Printed Pages: 2

SC

**SARDAR PATEL UNIVERSITY,**
**M.A. (PREVIOUS) (EXTERNAL) EXAMINATION,**
**2016**
**Monday, 25TH, April**
**10.30 A.M. To 01.30 P.M.**
**Subject Code: SAN-401**
**Sanskrit Literature (Principal): Paper-I**

**Total Marks: 100**

(१) शिशुपालवधम् (प्रथम सर्गः) - महाकवि माघः ।
(२) नैषधीयचरितम् (प्रथम सर्गः) - महाकवि श्रीहर्षः ।
(३) कादम्बरी (महाश्वेतावृत्तांत) बाणभट्टः ।

प्रश्न.१ (अ) નીચેનામાંથી ગમે તે બે શ્લોકોનો અનુવાદ કરો. (०८)

(१) पिशङ्गमौञ्जीयुजमर्जुनच्छविं वसानमेणाजिनमञ्जनद्युति ।
सुवर्णसूत्राकलिताधराम्बरां विडम्बयन्तं शितिवाससस्तनुम् ॥

(२) हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥

(३) उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वंभर विश्वमीशिषे ।
ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ॥

(४) अमानवं जातमजं कुले मनोः प्रभाविनं भाविनमन्तमात्मनः ।
मुमोच जानन्नपि जानकीं न यः सदाऽभिमानैकघना हि मानिनः ॥

प्रश्न.१ (બ) નીચેનામાંથી ગમે તે બે સસંદર્ભ સમજાવો. (०६)

(१) गृहानुपेतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः ।
(२) ग्रहीतुमार्यान्परिचर्यया मुहूर्महानुभावा हि नितान्तमर्थिनः ।
(३) उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया ।
(४) स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णन्दुनिभस्त्रिलोचनः ।

प्रश्न.२ ભારતીય આલંકારિકોના મહાકાવ્ય વિષયક મતોની ચર્ચા કરી, 'शिशुपालवधम्' મહાકાવ્યની સમીક્ષા કરો. (१६)

અથવા

प्रश्न.२ નીચેના વિશે સમીક્ષાત્મક નોંધ લખો. (१६)

(૧) શિશુપાલનો સંત્રાસ.
(૨) માઘનું જીવન.

प्रश्न.3 (અ) નીચેનામાંથી ગમે તે બે શ્લોકોનો અનુવાદ કરો. (०८)

(१) पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा ।
कथं न सा मदिगरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥

(२) अलं नलं रोद्धुममी किलाभवन् गुणा विवेकप्रभवा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः ॥

(३) हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमेणऽपि तस्य नः ।
त्रपा हरीणामिति नम्रितानर्नैर्न्यवर्ति तैरर्घनमः कृतक्रमैः ॥

(४) प्रकाममादित्यमवाप्य कण्टकैः करम्बिताऽमोदभरं विवृण्वती ।
घृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरायिता ॥

(P.T.O.)

પ્રશ્ન.૩ (બ) નીચેનામાંથી ગમે તે બે સસંદર્ભ સમજાવો. (૦૬)

(१) सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ।

(२) इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ।

(३) वनेऽपि तौर्य्यआत्रिकमाराघ तं क्व भोगमाप्नोति न भाग्यभाग्जनः ।

(४) गतिस्तयोरेष जनस्तमर्दयन्नहो विघे त्वां करुणा रुणद्धि नो ।

પ્રશ્ન.૪ 'नैषधीयचरितम्'ના આધારસ્થાનો આપી, તેમાં કવિકૃત પરિવર્તન અને પરિવર્ધન દર્શાવો. (૧૬)

અથવા

પ્રશ્ન.૪ નીચેના વિશે સમીક્ષાત્મક નોંધ લખો. (૧૬)

(૧) શ્રીહર્ષની વિદ્વતા.

(૨) દમયંતીનું પાત્રાલેખન.

પ્રશ્ન.૫ (અ) નીચેનામાંથી ગમે તે એક ગદ્યખંડનો અનુવાદ કરો. (૧૧)

(१) अथ गीतावसाने मूकीभूतवीणा प्रशान्तमघुकरमघुररुतेव कुमुदिनी सा कन्यका समुत्थाय प्रदक्षिणाकृत्य कृतहरप्रणामा परिवृत्य स्वभावघवलतया तपःप्रगल्भया दृष्ट्या समाश्वासयन्तीव, पुण्यैरिव स्पृशन्ती, तीर्थजलैरिव प्रक्षालयन्ती, तपोभिरिव पावयन्ती, शुद्धिमिव कुर्वाणा, वरप्रदानमिवोपपादयन्ती, पवित्रतामिव नयन्ती, चन्द्रापीडमाबभाषे 'स्वागतमतिथये कथमिमां भूमिमनुप्राप्तो महाभागस्तदुत्तिष्ठागम्यतामनुभूयतामतिथि-सत्कारः' इति ।

(२) आशया हि किमिव न क्रियते । तां च पापकारिणी कालरात्रिप्रतीभा वर्षसहस्रायमाणां यातनामयीमिव दुःखमयीमिव नरकमयीमिवाग्निमयीमिवोत्सन्ननिद्रा तथैव क्षितितले विचेष्टमाना रेणुकणघूसरैरश्रुजलार्दकपोलसंदानितैर्विमुक्तव्याकुलैः शिरोरुहैरुपरुद्धमुखी निर्दयाक्रन्दजर्जरस्वर-क्षयक्षामेण कण्ठेन तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षपतिवती ।

પ્રશ્ન.૫ (બ) નીચેનામાંથી ગમે તે ત્રણ સસંદર્ભ સમજાવો. (૦૯)

(१) न हि मे संशीतिरस्या दिव्यतां प्रति ।

(२) तासां चतुर्दश कुलानि । एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम् ।

(३) अदूरकोपा हि मुनिजनप्रकृतिः ।

(४) उच्चलितायाश्च मे दुर्निमित्तनिवेदकमस्पन्दत दक्षिणं लोचनम् ।

(५) प्रायेण चैवंविघा दिव्याः स्वप्नेप्यविसंवादिन्यो भवन्त्याकृतयः ।

પ્રશ્ન.૬ નીચેનામાંથી ગમે તે બે વિશે સમીક્ષાત્મક નોંધ લખો. (૨૦)

(૧) કાદમ્બરી-કાલિક સમાજ.

(૨) उत्प्रेक्षा तु बाणस्य ।

(૩) સિદ્ધાયતનનું વર્ણન.

(૪) મહાશ્વેતાનું પાત્રાલેખન.

ॐॐॐॐॐ